# ॥ श्रीब्रह्मण्य पञ्चरत्नम् ॥

षडाननं चन्दनलेपिताङ्गम्
महोरसं दिव्यमयूरवाहनम् ।
रुद्रस्य सूनुं सुरलोकनाथम्
ब्रह्मण्यदेवं शरणं प्रपद्ये ॥ १ ॥

जाज्वल्यमानं सुरवृन्दवन्द्यम्
कुमारधारातटमन्दिरस्थम् ।
कन्दर्परूपं कमनीयगात्रम्
ब्रह्मण्यदेवं शरणं प्रपद्ये ॥ २ ॥

द्विषड्भुजं द्वादशदिव्यनेत्रम्
त्रयीतनुं शूलमसी दधानम् ।
शेषावतारं कमनीयरूपम्
ब्रह्मण्यदेवं शरणं प्रपद्ये ॥ ३ ॥

सुरारिघोराहवशोभमानम्
सुरोत्तमं शक्तिधरं कुमारम् ।

सुधारशक्त्यायुध शोभिहस्तम्

ब्रह्मण्यदेवं शरणं प्रपद्ये ॥ ४ ॥

इष्टार्थसिद्धिप्रदमीशपुत्रम्

इष्टान्नदं भूसुरकामधेनुम् ।

गङ्गोद्भवं सर्वजनानुकूलम्

ब्रह्मण्यदेवं शरणं प्रपद्ये ॥ ५ ॥

यः श्लोकपञ्चमिदं पठतीह भक्त्या

ब्रह्मण्यदेव विनिवेशित मानसः सन् ।

प्राप्नोति भोगमखिलं भुवि यद्यदिष्टम्

अन्ते स गच्छति मुदा गुहसाम्यमेव ॥

॥ इति श्रीब्रह्मण्य पञ्चरत्नं समाप्तम् ॥

The Upasana of Sri Brahmanya, who represents the Niguna aspect of Su-Brahmanya, and the essence of the four Mahavakya-s, is taught to an advanced Srividya Upasaka after Purnabhisheka. This Pancharatna invokes the blessings of Sri Brahmanya in Kumaradhara Tirtha (Kukke Subrahmanya in Karnataka), where the presence of the Lord is in the form of a Sarpa.

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]